# Sankirna Padyani

# સઙ્કીર્ણપદ્યાનિ

## Document Information

Text title : Sankirna Padyani

File name : sankIrNapadyAni.itx

Category : vishhnu, vishnu, moropanta, raama, hanumaana

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# સઙ્કીર્ણપધાનિ

૧

(૧)વાતનન્દનમનઃશાન્તિકરચરણજલજાત કુશતાત કારુણ્યસિન્ધો!
શાતકુમ્ભાભપટ પાતકાપહ ધરણિજાતપઃફલ દીનલોકબન્ધો! ।
રામ રાજીવદલનયન રઘુવીર રવિવંશભૂષણરત્ન રાવણારે ! -ધ્રુવ૦ ॥ ૧ ॥

(૨)ચાપોનિગમાન્તગ સદાપદપહારરત તાપસારાધ્યપદ પુણ્યમૂર્તે! ।
(૩) ક્ષ્માપવર (૪)કુસુરવનિતાપવાદાઘસન્તાપભઞ્જન ભુવનગીતકીર્તે! રામ ॥ ૨ ॥

રક્ષસામન્તચતુર ક્ષમાપાલનપર ક્ષપાનાથજિતવદનકાન્તે ! ।
રક્ષ (૫)રોમજમુદાર ક્ષમાદિગુણનિકરક્ષય સ્મૃતિરસ્તુ મયિ તવાન્તે !રામ ॥ ૩ ॥

૨

કથં તં ન ભજે પાવનકથમ્ । શમિતામિતહૃદ્વ્યથં કથં -ધ્રુવ૦ ॥

ત્રાતું (૬)ક્ષમમનલસમખિલં જગદિદં ખલુ યથાતથં ।
કુર્વતં શરણાગતસમવનમતુલવિપદિ સશપથમ્ । કથં૦ ॥ ૧ ॥

પરિતસંશ્રિતજનઘનધનતનયાદ્યખિલમનોરથં ।
(૭)કમલાવરમજમમલાશયમરિકરમણ્ડજવરરથમ્ । કથં૦ ॥ ૨ ॥

ભક્કમયૂરદયાઘનમિનકુલપતિમતિભાવુકપથં ।
યમભજતો જનુરમપતેરપિ વરમપિ ભવતિ વિતથમ્ । કથં૦ ॥ ૩ ॥

૩

વક્ષ સકલભક્તવૃન્દરક્ષણપ્રવીણચરણ દક્ષમહાધ્વરવિનાશદક્ષ ચન્દ્રગિરિપયો-
વલક્ષદેહ રક્ષ માં દ્રુતં
યક્ષનાથસખ ભવાભિધાર્યુપદ્રુતં
ન ક્ષમત્યજ ક્ષમસ્વ બહુભયાદ્રુતમ્ ॥ ૧ ॥

શઙ્કરેગા શિવ શરણ્ય શમશેવધે! -ધ્રુવ૦ ॥

સ્વર્વધૂસમર્ચિતાઙ્ઘ્રિપર્વ સમુદિતેન્દુકાન્તિગર્વતસ્કરાસ્યપદ્મ પર્વતેન્દ્રજાધવ ગન્ધર્વ-
ગીતગુણજગત્પતે
શર્વ! । કુર્વયે! દયાં ત્વદઙ્ઘ્રિયુગનતે
સર્વભુવનનાથ ન સમુચિતમદો નતે । શઙ્કરેશ ॥ ૨॥

ભાલદૃગાવિર્ભવત્કરાલવીતિહોત્રખરજ્વાલદગ્ધરતિપ્રાણપાલ સજ્જનસ્વમાન-
સાલયાદ્ય પાલયાકુલં
વ્યાલમુણ્ડમાલધર ન મેઽન્યદિહ બલં
કાલકૂટકણ્ઠ સમવ (૮) રામસુતમલમ્ । શઙ્કરેશ૦॥ ૩॥

૪

(૯)કુણ્ડલીશશયન મકરકુણ્ડલિનનન્તગુણ મૃકણ્ડતનયદર્શિતચિદખણ્ડમોદરૂપ સદઘખણ્ડ નૈકપણ્ડિતપ્રભો!
પુણ્ડરકિવરદ ભુવનમણ્ડનાદ્ય ભો! ।
પુણ્ડરીકનયન શમય ભવભયં વિભો ! । ! ॥ ૧॥

પાણ્ડુરઙ્ગ મામિહાવ શરણાગતં -ધ્રુવ૦॥

ચણ્ડપરાક્રમ સ્વભુજદણ્ડબલવિમર્દિતારિમણ્ડલાનવદ્યગુણકરણ્ડ (૧૦)મુકુલતલસ્વ
ચ્છગણ્ડતુસ્તુણ્ડજનિતનો(૧૧) !
ખણ્ડપરશુજપ્યનામધેયસન્મનો
અણ્ડકૂપરોમકૂપસકલતનુતનો! પાણ્ડુરઙ્ગ ॥ ૨॥

અણ્ડજેન્દ્રવાહન વેતણ્ડપરિત્રાણપટૂદ્દણ્ડદયાધારહૃદાખણ્ડલાનુજને શિરસ્યઞ્જલિ
નિધાય નુતિરતં
દણ્ડવત્ પ્રણમ્ય ચિન્તયન્તમવિરતં
દણ્ડપાણિભીતિમલં રામસુતમિતમ્ । પાણ્ડુરઙ્ગ ॥ ૩॥

૫

બ્રહ્મપુરન્દરમુખવૃન્દારકવૃન્દવન્દ્યમીશ્વરં
મન્દરમન્દિરમિન્દીવરદલરુચિબન્ધુરકન્ધરમ્ ॥ ૧॥

વન્દે મન્મથહરમ્ । હરં તં -ધ્રુવ૦॥

હિમનગપતિનિજદુહિતૃમુખસલિલરુહમધુરસમધુકરં
સ્વચરણયુગપરિચરણરતહૃદયજનસમુદયસુખકરમ્ । હરં તમ્ ॥ ૨॥

વામદેવમમિતામરનુતપદતામરસં સુખકરં
રામતનૂજભવામયવૈદ્યમકામદત્તપરવરમ્ । હરં તમ્ ॥ ૩॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતા સઙ્કીર્ણપદ્યાણિ સમાપ્તા ।

૧। વાતનન્દનો હનૂમાંસ્તસ્ય મનઃશાન્તિકરં ચરણજલજાતં ચરણકમલં યસ્ય નત્સમ્બુદ્ધૌ । “શાત” ઇતિ લિપિકરપ્રમાદઃ ।

૨। ધનુર્વેદપારગ ।

૩। ભૂપતિશ્રેષ્ઠ

૪। કુસુરો ભૂસુરો ગૌતમઃ ।

૫। રામજં રામનન્દનં મયૂર કવિમ્ ।

૬। અનલસમાલસ્યરહિનમ્ ।

૭। અરિકરં ચક્રપાણિમ્ ।

૮। સમવ સમ્યક્તયા રક્ષેત્યર્થઃ ।

૯। કુણ્ડલાંશઃ સાધિરાજઃ । શેષ ઇતિ યાવત્ ।

૧૦। રલયોરભેદાન્મુકુલો મુકુરઃ । દર્પણ ઇત્યર્થઃ ।

૧૧। ચતુસ્તુણ્ડો બ્રહ્મા ।

Proofread by Rajesh Thyagarajan

---

*Sankirna Padyani*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*